क्र0-140
पा०सं.--2712
शास्त्र स्तोत्र मन्त्र
पत्र-8-पूर्ण-तन्त्र

२१८

पी० सं० 2712

॥द्वारभस्तोत्रमंत्रपत्रै१०॥ -2

तं-त

क्र० - 140

8 -पूर्ण

श्रीगणेशायनमः॥अथातःश्रृणुदेवेशीसर्वलक्षणमद्भुतं॥
॥१॥ शारभंकवचंनामचतुर्वर्गफलप्रदं॥१॥शारभशाल्वपक्षी
शराजारव्यकवचस्यतु॥सदाशिवऋषिछंदोबृहतीशार
भेश्वरः॥२॥देवताप्रणवोबीजंप्रकृतिःशक्तिरुच्यते॥की
लकंपक्षिराजेतिसर्वरक्षाकरोविभुः॥३॥परप्रयोगशांत्यर्थं
सर्वशत्रुनिवृत्तये॥चतुर्वर्गार्थसिध्यर्थेविनियोजस्यकर्मणः
॥४॥ॐअस्यश्रीशारभेश्वरकवचस्तोत्रमालामंत्रस्यसदा
शिवऋषिः॥बृहतीछंदः॥श्रीभगवान्शारभेश्वरोदेवता॥
ॐखंबीजं॥फट्प्रकृतिशक्तिः॥पक्षिराजायकीलकं॥प
रप्रयोगशांत्यर्थेसर्वशत्रुनिवृत्तयेचतुर्वर्गार्थसिध्यर्थेश्री
शारभेश्वरप्रसादफलप्राप्त्यैजपेविनियोगः॥खामित्यादि ॥१॥
षट्दीर्घेनषडंगंन्यासः॥अथध्यानं॥रत्नाभंसुप्रसन्नं

त्रिनयनममृतोन्मत्तभावाभिरामं कारुण्यांभोधिमीशं वरदभयदं चंद्रेरखावतंसं॥ शंखध्वांताखिलाशाप्रतिहतविधिनाभासमानात्मभावं सर्वेशं साक्षुवेशं प्रणलभयहरं पक्षिराजं नमामि॥५॥ इति ध्यात्वा॥ ॐ श्री शिवः पुरतः पातु मा याधीशस्तु पृष्टतः॥ पिनाकी दक्षिणं पार्श्वे वामं पातु महेश्वरः॥१॥ शिखाग्रं पातु मे शंभुर्निटिलं पातु शंकरः॥ ईश्वरो वदनं पातु भ्रुवोर्मध्ये पुरांतकः॥२॥ भ्रुवौ तु पातु मे स्थाणुः कपर्दी पातु लोचने॥ शिवो मे श्रोत्रयोः पातु वागीशः पातु लंबिकां॥ ३॥ नासयोर्मे वृषारूढो नासाग्रं वृषभध्वजः॥ स्मरारिः पातु मे नात्वाञ्जोष्टयोर्भक्तवत्सलः॥४॥ पातु मृत्युंजयो दंतान् चुबुकं पातु भूधरः॥ परमेशः कपोलौ मे त्रिकं पातु कपालधृक्॥५॥ कंठं पशुपतिः पातु शूली पातु हनुं मम॥ स्कंधद्वयं हरः पातु धू

जेटिः पातु मे भुजौ ॥६॥ भुजसंधिं महादेव ईशानो मे प्रकूर्परं ॥ म
॥२॥ ध्यसंधी जगंनाथः प्रकोष्ठे चंद्रशेखरः ॥७॥ मणिबंधौ त्रिनेत्रो
मे भीमः पातु करस्थले ॥ करपृष्ठे मृडः पातु रुद्रो गुष्ठद्वयं मम ॥
८॥ उमासहायस्तर्जन्यौ भर्गो मे पातु मध्यमे ॥ अनामिके करा
लास्यः कालकंठः कनिष्ठिके ॥९॥ गंगाधरों गुलीपर्वाण्यप्रमे
यो नखानि मे ॥ वक्षस्तत्पुरुषः पातु कक्षौ दक्षाध्वरांतकः ॥१०॥ अ
घोरो हृदयं पातु वामदेवस्तनद्वयं ॥ भालहक् जठरं पातु नाभिं
नारायणोव्ययः ॥११॥ गुह्यं प्रजाकरः पातु कुक्षिं पार्श्वो महाब
लः ॥ सद्योजातः कटिं पातु पृष्ठभागं तु भैरवः ॥१२॥ मोहनो जघ
नं पातु गुदं मम जितेंद्रियः ॥ ऊरुयुग्मं भवः पातु जानुयुग्मं भवां
तकः ॥१३॥ हुंकारः पातु मे जंघे फट्कारो मम गुल्फके ॥ वषट्
कारः पादपृष्ठे वौषट्कारस्त्वधस्थले ॥१४॥ स्वाहाकारों गुली ॥२॥
पार्श्वे स्वधाकारों गुली मम ॥ त्वरितः सर्वसंधिर्मे रोमकूपेन्द्रसिं

हजित्॥१५॥त्वचं पातु मनोवेगः कालजिद्रुधिरं पातु मम॥पुष्टिदः पातु मे मांसं मेदो मे स्वस्तिदोवतु॥१६॥सर्वात्मास्थि नि मे पातु मज्जां मम जगत्प्रभुः॥शुक्रं वृद्धिकरः पातु बुद्धिं वाचामधीश्वरः॥१७॥मूलाधारांबुजे पातु भगवान् शरभेश्वरः॥१८॥स्वाधिष्ठानमजः पातु मणिपूर हरिप्रियः॥१९॥अनाहतं सात्त्वुवेशो विशुद्धं जीवनायकः॥सर्वज्ञानप्रदो देवो ललाटं मे सदाशिवः॥१९॥ ब्रं स्वरं ध्रं महादेवः पक्षिराजो खिलाकृतिः॥सर्वलोकवशीकारः पातु मां परवीर्यजित्॥२०॥वज्रमुष्टिवराभीतिहस्तः कालाग्निसंनिभः॥विजयासहितः पातु चैंद्री ककुभमग्निजित्॥२१॥शक्तिशूलकपालासिहस्तः सौदामिनीप्रभः॥जयायुतो महाभीम पातु वैश्वानरं दिशि॥२२॥दंडासिमुशलं हालपाशांकुशकरांबुजः॥यमांतको जितायुक्तो निशं पातु दिशां यमी॥२३॥खड्ग खेटाविप रशु. हस्तः शत्रुवि

मर्दकः॥ अपराजितयायुक्तः सदाव्यान्नैर्ऋतीं दिशं॥२४॥ पाशां
॥३॥ कुशधनुर्बाणः पाणिश्चोणियुवाग्रजः॥ हरिद्राभो निशं पायाद्वारु
णीं दिशमात्मजित्॥२५॥ ध्वजाग्रकवचोदारस्तुजोदुर्गायुतः
खगः॥ चंडवेगः शिवः पायात्संततं मारुतीं दिशं॥२६॥ गदा
क्षस्रग्वराभीतिकरांभोजः श्रियायुतः॥ कनकाभो महातेजाः
पातु कौबेरिकीं दिशं॥२७॥ त्रिशूलाहिकपालाग्नि[illegible]दोस्थले
विद्यायायुतः॥ भस्मोद्धूलितसर्वांगो दिशं पात्वपराजितां॥२८
॥ जपस्रक्पुस्तकांभोजकमंडलुकरांबुजः॥ ऊर्ध्वं पातु गिरा
युक्तः सर्वभूतहितेरतः॥२९॥ शंखचक्रवराभीतिहस्तः पद्मा
युतोव्ययः॥ नीलांजनसमानीलः पातालं पात्वनंतरं॥३०॥ अ
नुक्ता विदिशः पातु शणुवो नारसिंहजित्॥ शरभः पातु संग्रा
मे युद्धे वैरिकुलांतकः॥३१॥ सर्वसौभाग्यदः पातु जाग्रत्स्व ॥३॥
प्रसुषुप्तिषु॥ सर्वसंपत्प्रदः पातु धनधान्यादिकं मम॥३२॥

संतानदः सुतां[illegible]न्पातु पुत्रानायुष्करोनिशं॥ बंधवृद्धिकरः
पातु गृहंममचशंकरः॥२३॥ ग्रामं ग्रामेश्वरः पातु राज्यंपातु
दिगंबरः॥ राष्ट्रान्शांतिकरः पातु राजानंधर्मसंग्रहः॥२४॥
मार्गंदक्षहरः पातु वर्मकर्माणि भैरवः॥ बटुकः पातु मे सर्वे अ
वस्थासु भगेषु च॥२५॥ त्रिलवीक्षणसंस्पृष्ट प्राणरक्षामनो
जवः॥ स्पृशन् पशून्जपंकृत्वा प्रतिस्थानं समाहितः॥२७॥
प्रार्थयेद[illegible]त्वं स्वदेहदिस्थं सालुवेश्वरं॥ प्रतिनामच
तुर्थ्यंतस्पर्शोमित्यभिधीयते॥२८॥ साधकप्रथमंतारं नमो
भगवते तिच॥ प्रधानं मूर्तिभावश्च प्रासादव्यापुसिद्धिकृ
त्॥२९॥ द्वि[illegible] ज्वलप्रज्वलसाध्यं साधयद्विर्द्विरक्षत
त्॥ सर्वभूतेभ्यो हुंफट् स्वाहान्तयतदीक्षणं॥४०॥ ॐ नमो
भगवते ज्वलज्वलप्रज्वलप्रज्वल सर्वसाध्यंसाधयसा

घयमहांरक्षरक्षसर्वेभूतेभ्योहुंफट्स्वाहा॥ ॥येग्रामघा
तकाः क्रूराकूपटादंष्ट्रिकाभेलाः॥तस्कराःशात्रवःक्रुद्धाव
॥४॥ धोद्युक्तावलोचनाः॥छद्मचाराविशाभृष्टाःदिवाचरनिशा
चराः॥४०॥तेसर्वेपक्षिराजस्यपक्षवातपराहताः॥स्त्री
बालसहिताःक्षिप्रंपितृमातृकुलान्विताः॥४१॥भग्न
चित्ताहतस्थानायांतुदेशांतरस्वयं॥येचदुष्टग्रहारक्षाः
पिशाचादेवयोनयः॥४२॥चतुःषष्टिगणाःसहस्रसंख्यु
तरकाग्रहाः॥अष्टाशीतिमहाभूताःसहस्रकोटिमहाग्र
हाः॥४३॥नवतिर्ज्वरभेदाश्चशतभेदाश्चकृत्रिमाः॥पंचाश
द्गणनाथाश्चनियुताकृतिमाग्रहाः॥४४॥प्रेतारूढास्त्रयस्त्रिं
शत्सिंदुदानपरायणाः॥अयुतंक्षुद्रभेदाश्चचत्वारिंशच्छिवाद्ध
या॥४५॥द्वात्रिंशद्दहिवक्राश्चविंशन्मार्जारवक्रकाः॥चतुः ॥४॥
षष्ट्याकुरूपाश्चयेचान्येक्षुद्रयोनयः॥४६॥तेसर्वेसालुवे

शास्यशंखनिस्वनमोहिताः॥ विषण्णाश्चालितःस्वांताः त्राण
त्राणपरायणाः॥४७॥ गच्छंतु सत्वरयोक्तारो देशांतरस निश्च
या॥ येच मूषकवेतालभुनकोरगवृश्चिकाः॥४८॥ अशीविषाः
शिवाव्याल व्याघ्रऋक्षभस्तकराः॥ गृध्राः श्येनाः खगाः काका
ध्वंसकाभ्रंशकामृगाः॥४९॥ एते शरभहस्ताग्रनखोत्करवि
मोक्षिताः॥ स्त्रवद्रक्तच्छटासिक्ताः शिलातलविताडिताः॥५०
॥ संभेदतनवः शीघ्रं नश्यंत्वखिलदुश्चराः॥ न दंशात्युरगा क्वा
पि नातिवातो विजीयेतु॥५१॥ न दहत्वसहो वह्निरापं तापो न
चाधिकं॥ न वर्षत्वतिरश्मिश्च न पतत्वशनिः क्वचित्॥५२॥ ना
कालमृत्युपमृत्युश्च नात्युत्पातः कदाचन॥ नमत्युत्यं भसि जनः
न भवत्यशुभं क्वचित्॥५३॥ न वदत्वशुभं वाक्यं जंतवो मम
देशके॥ न तु वैरं कुजंतूनामन्योन्यं मम राजके॥५४॥ भवंतु सु
खिनः सर्वे सर्वाः संतु पवित्रताः॥ सर्वाः सवंतु सत्पुत्रान् पु

॥५॥ न्यश्चशुभलक्षणाः॥५५सर्वेंदेवाश्चनंदतुसंतुकल्याणकारिणः
॥राजन्वतीमही-चास्तुराजाभवतुधार्मिकः॥५६॥संस्रवंतु
पयोगावःफलंत्वौषधयोधिकं॥भवंतुफलदावृक्षाऋद्धिंभ
वतुमखिलं॥५७॥ममास्तुत्वरसानूनंमात्मज्ञानमचंचलं॥
कामक्रोधंमोहलोभंसंमोहमदमत्सरः॥५८॥संतुनकपि
देवेशाभगवान्करुणानिधे॥शरभेश्वरविश्वेशापक्षिराजद
यानिधे॥५९॥देहिमेनिश्चलांभक्तिंप्रणतोस्मिपुनःपुनः
॥गौरीवल्लभकामारेकालकूटविषादन॥६०॥मामुद्धराप
दांभोधेत्रिपुरघ्नोघहारक॥सात्वुवेशाजगंनाथसर्वलोक
हितेरत॥६१॥पाहिमांत्वरसाघोरान्दुष्टान्नाशयनाशय
॥कालभैरवविश्वेशविश्वरक्षापरायणाः॥६२॥रक्षमूषक
चोरेभ्योधान्यराशिमिमंप्रभो॥पक्षिराजमहादेवप्रणतार्ति ॥५॥
विनाशन॥६३॥मदीयानिपदार्थानिनित्यंपालयपालय॥

सर्वज्ञः सर्वलोकेशः सर्वदुष्टविनाशकः ॥ ६४ ॥ तस्करेण हृतं वस्तु ध्रुवं दापयदापय ॥ येमर्मवादिनः क्षुद्राः क्षुद्रोपद्रवकारकाः ॥ ६५ ॥ सर्वाचारपरित्यक्ता मानहीनाश्च रोधकाः ॥ ते सर्वे सान्तु वेशस्य मुशलायुधचूर्णिताः ॥ ६६ ॥ नश्यंतु निमिषार्द्धेन पावकारुणतूलवत् ॥ याजनाद्धीहिणो स्यात्स्वस्त्यक्ता लौचितभाषणाः ॥ ६७ ॥ सत्कर्मविप्रकर्तारः शांतभक्तिपरायणाः ॥ ते सान्तु वेषहस्ताग्रखड्गनिर्भिन्नदेहिनः ॥ ६८ ॥ पतंतु भूतले यान्त्यां प्राणां स्तेषां प्रयांत्वरं ॥ त्वदंघ्रिध्याननिर्दग्धपापकोशाय मंत्रिणे ॥ ६९ ॥ मह्यं द्रुह्यंति ये तेषां विभवाश्च क्षयांत्वरं ॥ त्वदाचारपरं भक्तं साधकं विवेकिनं ॥ ७० ॥ ये आक्रमंति संग्रामे ते गच्छंतु पराहताः ॥ त्वदीयेनैव मार्गेण संचरंतमनारतं ॥ ७१ ॥ ये वदंति प

रीवादं भ्रांताः शीघ्रं पतंतु ते॥ त्वद्द्वासममलं धीरं योमां तर्जयितुं बलात्॥७२॥ मनसायेनमन्यंते तत्स्वांतं भ्रमतुक्षणात्॥ मन
॥६॥ साकर्मणा वाचा ये कुर्वंत्यतिदुःसहं॥७३॥ ते महाशोकरोगांधाः पतंत्वाशु शिवाज्ञया॥ मदीयानि पदार्थानि गृहीतुं यावलोकते॥७४॥ तत्क्षणादेव नश्यंक्षोभवेसर्वक्षीश्वराज्ञया॥ मदीयं द्रव्यमाहृत्य ये गच्छंति हतस्करा॥७५॥ सिद्धारिपाशबद्धास्ते विचरंतु प्रदक्षिणं॥ सीमातीताश्च ये चोरा गृहीतद्रव्यसंचयः॥७६॥ अवशावयवास्ते वै गागच्छंतु शिवाज्ञया॥ तस्कराः निम्नगातीताः स्वांतधान्यधनादिकाः॥७७॥ पक्षिराट् क्रोटराकूसाः समागच्छंतु ते हताः॥ हृत्वा पदार्थो द्यादेशं अतीताश्च नतस्कराः॥७८॥ शालभेशाहलाहत्वा स्तेत्वा गच्छंतु सानुगाः॥ चोरागृहीतुमुद्युक्ताः समागच्छंतु मद्गृहं॥७९॥ पक्षि ॥७॥
राजांकुशाकृष्टाः समागच्छंतु वेद्रुतं॥ समाहृत्य पदार्थों घा

न्देशालीनाश्च तस्कराः॥ ८०॥ तेसालुवेषपक्षोघो वातेग
च्छंतुसत्वरं॥ शांतंविवेकिनंभक्तं त्वदंघ्रिध्यानतत्परं॥८१॥
ब्रुवंतियेसहप्राणास्तेषांयांतुयमीपुरीं॥ षट्त्रिंशत्कोष्टकेयं
त्रेरेखाश्लाग्रमध्यगे॥ ८२॥स्वेच्छायंत्रंलिखित्वातु जपन्ना
राध्यसाधकाः॥उदङ्मुखंसहस्रंतु रक्षणायजपेन्निशि॥
८३॥नष्टाहरणकेपंचरात्रौपश्चिमदिङ्मुखः॥मारणेसप्तरा
त्रंतुदक्षिणाभिमुखो जपेत्॥ ८४॥ रोगनिग्रहणेचाष्टरात्रमा
ग्नेयदिङ्मुखः॥इतिगुह्यंमहामंत्रंपरमंसर्वसिद्धिदं॥८५॥
शारभेशाख्यंकवचंचतुर्वर्गफलप्रदं॥प्रत्यहंप्रतिपक्षंच प्र
तिमासमथापिवा॥ योजपेत्प्रतिवर्षंवावरेण्यःसशिवोभवेत्॥ वो॥
एवंहिजपतःपुंसांपातकंचोपपातकं॥८७॥नत्सर्वंलयमाप्नो
तिरविणातिमिरंयथा॥दशांशंयोजपेन्नित्यंप्रातरुत्थायसा
धकः॥८८॥सर्वसिद्धिसमाप्तिस्यदेहांतेसशिवोभवेत्॥त्रि

कालंध्यानपूर्वंतु जपेद्द्वादशवार्षिकं॥९॥कायेनानेनदेवेशी
॥७॥ जीवन्मुक्तोभवेन्नरः॥ शतवारंजपेन्नित्यंमंडलंयोवरानने॥१०॥
सोणिमादिगुणान्प्राप्यविचरेत्स्वेच्छयासदा॥आतलादिधर
ण्यादिभुवनानिचतुर्दश॥११॥विचरेत्कामितःसर्वैःपूज्य
मानोयथासुखं॥त्रिमासंयोजपेन्नित्यंमष्टोत्तरसहस्रकः॥
१२॥सहस्रांशारभेशस्यसारूप्यंलभतेंबिके॥षण्मासंयो
जपेन्नित्यंप्रयतस्तुदृढव्रतः॥१३॥मद्रूपधारकेमंत्रैःसर्वे
सिद्धिप्रदायकैः॥ममलोकेषुसंपूज्योविष्णुलोकेतथैवच
॥१४॥ब्रह्मलोकेचरमतेसर्वत्रननिवार्यते॥इंद्राग्नियम
रक्षेशजलेशांपवनेसह॥१५॥सोमेशानकलक्ष्मीशोदिशां
पालैःसपूज्यते॥आदित्यःसोमपृथ्वीजबुधश्रीगुरुभार्गवैः ५
॥१६॥पूज्यतेसग्रहैःसर्वैःशनिराहुसुकेतुभिः॥ऋत्वंगि ॥७॥
रापुलस्त्य[illegible]श्चपुलहात्रिमरीचिभिः॥१७॥दक्षकाश्यप

र्ग्वाद्यैः योगिभिः सह पाल्यते॥ भैरवैर्वसुभिरौद्रै रादित्यै
र्लोकपालकैः॥९८॥ दिग्गजैश्च महानागैर्दिव्यास्त्रैर्दिव्यवाह
नैः॥ महैश्वर्यैर्महारत्नैः कामधेनु सुरद्रुमैः॥९९॥ सरिद्भिः सा
गरैः शैलैर्देवताभिस्तपोधनैः॥ दानवैराक्षसैः क्रूरैः सिद्धगं
धर्वकिन्नरैः॥१००॥ यक्षविद्याधरैर्नागैरप्सरोभिश्च पूज्यते
॥ अपस्मारग्रहैर्भीमैरुन्मत्तैर्ब्रह्मराक्षसैः॥१०१॥ वेतालैः
खेचरैर्मंत्रैः कूष्मांडै राक्षसैर्ग्रहैः॥ ज्वालावक्त्रैस्तमोहारैः
स्त्रीग्रहैः पापविक्रमैः॥१०२॥ भूतप्रेतपिशाचाद्यैः ग्रहैः स
र्वैः प्रपूज्यते॥ ब्राह्मणैः क्षत्रियैः शूद्रैरन्यैश्च जातिभिः॥१०३
॥ पशुपक्षिमृगैर्व्यालैः पूज्यते सर्वजंतुभिः॥ आब्रह्मस्तंभप
र्यंतं पूज्यमानो भविष्यति॥१०४॥ किमत्र बहुना देवि तवं वक्ष्य
यथातथं॥ मया च विष्णुना चैव विश्वकर्त्ता च पाल्यते॥१०५॥ भ
वत्या च गिरा लक्ष्म्या ब्रह्मण्या च स्वनामभिः॥ गणेश्वरादियो

गीद्रैर्योगिनीभिः सपाल्यते॥ १०६॥ यइदं प्रजपेद्रक्त्या साध्यं नैव च विद्यते॥ कवचेंद्रं महामंत्रं जपेत्तस्मादनुत्तमं॥१०७॥
॥८॥ उच्चाटने मरुद्वक्त्रो विद्वेशो राक्षसानतः॥ प्रागानोभिरद्वौ तु सर्वे श्रीशानदिङ्मुखः॥१०८॥ योजपेत्कवचं नित्यं त्रिकालं ध्यानपूर्वकं॥ सर्वसिद्धिमवाप्नोति सहसा साधकोत्तमः॥१०९॥ देवदेव जगंनाथ शिव कारुण्यवारिधे॥ पाहि मां प्रणतः स्वामिन्प्रसीद परमेश्वर॥११०॥ यत्कृतं तन्न कृत्यं यदकृत्यं कृतं सवन्तदाचरितं॥ उभयोः प्रायश्चितं शिवतव नामाक्षरद्वयोच्चरितं॥१११॥ ज्ञानाज्ञानप्रयुक्तानां तापानां महतामपि॥ एकांतनिष्कृतिः शंभोः सकृदेव हि कीर्त्तनं॥११२॥ इति श्री आकाशभैरवे कल्पेशरभकवचं नाम एकचत्वारिंशोध्यायः॥ ॥ ॐ ऐं ह्रीं श्रीं ॐ नमो भगवते श्री शिवाय मम पुरतः ॥८॥
ज्वल २ प्रज्वल २ मम कार्यं साधय साधय मां रक्ष रक्ष सर्व